# BK BIRLA CENTRE FOR EDUCATION

**SARALA BIRLA GROUP OF SCHOOLS**
**SENIOR SECONDARY| CO-ED DAY CUM BOYS' RESIDENTIAL SCHOOL**
**MID-TERM_EXAMINATION 2024-25**
**SANSKRIT (119)**

Class : X — Duration : 3 Hrs
Date : 25.09.2024 — Max. Marks : **80**
Admission No.: — Roll No.:

---

**सामान्य निर्देशाः –**

- कृपया सम्यकतया परीक्षणं कुर्वन्तु अस्मिन् प्रश्नपत्रे अष्टादश् प्रश्नाः सन्ति।
- उत्तर लेखनात् पूर्वं प्रश्नस्य क्रमांकः अवश्यमेव लेखनीयः।
- प्रश्नस्य क्रमांकः प्रश्नपत्रानुसारम् एव लेखनीयः।
- सर्वेषां प्रश्नानाम् उत्तराणि निर्देशानुसारं लेखनीयानि।
- प्रश्नानां निर्देशाः ध्यानेन पठनीयाः।

---

## (खण्ड क)

### अपठितावबोधनम् (10 अंकात्मकः)

**प्रश्न 01 अधोलिखितं गद्यांशं पठित्वा प्रदत्त प्रश्नानामुत्तराणि संस्कृतेन लिखत –**

(नीचे लिखे गद्यांश को पढ़कर दिए प्रश्नों के उत्तर संस्कृत में लिखिए।)

अस्माकं जीवने यः समयः अतीतः स तु गतः, अतः तस्य विषये चिन्ता न करणीया। अवशिष्टं जीवनं सार्थकं कुर्याम। दिने–दिने स्वार्थः न्यूनः भवेत्, परार्थः अधिकाधिकः भवेत्। अस्मिन्नेव सुखस्य रहस्यम् अस्ति। 'स्वस्मै स्वल्पम् समाजाय सर्वस्वम्' इति उक्तेः अनुसारं जीवने एव जीवनस्य सार्थकता अस्ति। एवं जगतः इतः अपि सुंन्दरतरं भवेत्। अवशिष्टमं जीवनं सेवया अपि सुशोभितः भविष्यति। जीवने यावत् सेवायाः प्राबल्यं वर्धते तावद् एव जीवनस्य सार्थकता संदृष्यते। पशुपक्षिपादपवृक्षाः अहर्निशं यथासामर्थ्यं परोपकारं कुर्वन्ति। ते कदापि श्रान्ताः अहंकारेण प्रभाविताः न भवन्ति, अतः तेषां जीवने दुःखस्य स्थानम् एव न भवति।

**(अ) एकपदेन उत्तरत –** (केवलं प्रश्नद्वयम्) **(1/2×4=2 अंकौ)**

(1) प्रतिदिनं कः न्यूनः भवेत् ?
(2) प्रतिदिनं कः अधिकाधिकः भवेत् ?
(3) वयं कस्मै सर्वस्वम् अर्पयाम ?
(4) इतः अपि कः सुन्दरतरं भवेत् ?

**(ब) पूर्णवाक्येन उत्तरत –** (केवलं प्रश्नद्वयम्) **(2×2=4 अंकाः)**

(1) जीवनस्य सार्थकता कस्याः उक्तेः अनुसारं जीवने अस्ति ?
(2) कस्य विषये चिन्ता न करणीया ?

**(स) अस्य अनुच्छेदस्य कृते उचितं शीर्षकं संस्कृते लिखत। (1×1=1 अंकः)**

**(द) यथानिर्देशं उत्तरत – भाषा संबन्धी कार्य** (केवलं प्रश्नत्रयम्) **(1×1=3 अंकाः)**

(1) 'शेषम्' इति पदस्य किं समानार्थकं पदं अत्र प्रयुक्तम् ?
(क) शिष्टम् (ख) अवशिष्टम् (ग) सार्थकम् (घ) स्वल्पं

(2) 'अवशिष्टम्' इति पदं कस्य पदस्य विशेषणम् ?
(क) जीवनं (ख) सार्थकं (ग) निरर्थकम् (घ) व्यर्थम्

(3) तस्य विषये चिन्ता न करणीया। इत्यत्र तस्य कस्य कृते प्रयुक्तम् ?
(क) समाजस्य (ख) विश्वस्य (ग) संसारस्य (घ) समयस्य

(4) अस्मिन्नेव सुखस्य रहस्यम् अस्ति। वाक्येसिमन् कः अव्ययः प्रयुक्तः ?
(क) अस्मिन् (ख) सुख (ग) अस्य (घ) एव

## (खण्ड ख)

## रचनात्मककार्यम् (15 अंकात्मकः)

**प्रश्न 02 भवान्/भवती सौम्य/सौम्या स्वविद्यालयस्य वर्णनं कुर्वन् मित्राय लिखिते पत्रे रिक्तस्थानानि पूरयित्वा उत्तरपुस्तिकायां पुनः लिखत –** **(1/2×10=5 अंकाः)**

भवान्/भवती सौम्य/सौम्या हैं। अपने विद्यालय का वर्णन करते हुए मित्र को लिखे पत्र को कोष्ठक में दिए पदों की सहायता से रिक्तस्थान भरकर उत्तरपुस्तिका में पुनः लिखिए–

परीक्षाभवनम्
दिनांकः –––

प्रिय मित्र (1) ––––––
(2) –––––––– नमस्कारः।

अहं कुशलः अस्मि, भवतः (3) –––––– कामनां करोमि। भवतः पत्रं प्राप्तम्। भवान् पत्रे मम विद्यालयस्य वर्णनं इष्टवान्, अतः पत्रेस्मिन् अहं (4) –––––– वर्णनं लिखन् अस्मि। भवान् मम विद्यालयस्य वर्णनं ज्ञात्वा (5) –––––– भविष्यति।

मम (6) –––––– विशालः विस्तृतः सुन्दरः च अस्ति। अत्र (7) –––––– छात्राः सन्ति। विद्यालये अनेके वृक्षाः सन्ति। सर्वत हरितमयं वातावरणम् अस्ति । विद्यालये द्वितीया कक्षादारभ्य (8) –––––– कक्षां यावत् अध्ययनं भवति। त्रिचत्वारिंशत् कक्षाः सन्ति। (9) –––––– पुस्तकालयः अपि अस्ति। पंच छात्रावासाः सन्ति। छात्रासेषु त्रिशताधिकाः छात्राः निवसन्ति। विशालः भोजनालयः अपि अस्ति। सुमधुरं भोजनम् अल्पाहारादिकं ततः लभते। बोर्डकक्षासु उत्तमः परिणामः आगच्छति। भवान् एकदा विद्यालयम् आगत्य भ्रमतु सर्वं ज्ञास्यति। मातापित्रोः प्रणामाः।

(10) –––––– अवकाशे मिलामः।

भवतः अभिन्न मित्रम्
सौम्य/सौम्या

| **मंजूषा** |
|---|
| दीपावल्याः, सस्नेहं, द्वादशी, स्वविद्यालयस्य, पंचशत्, संजीवः, कुशलतायाः, प्रसन्नो, विशालः, विद्यालयः, |

**प्रश्न 03 'विद्यालये वृक्षाणां संरक्षणम्' इति विषयम् अधिकृत्य मंजूषातः शब्दान् चित्वा संस्कृतभाषया पंचवाक्यानि रचयत–** **(5 अंकाः)**

विद्यालय में वृक्षों का संरक्षण इस विषय पर कोष्ठक से शब्द चुनकर संस्कृतभाषा में पाँच वाक्य लिखिए–

| |
|---|
| **मंजूषा** – वृक्षाः, परोपकारकाः, वाटिकायां, वृक्षारोपणम्, प्रत्येकं छात्रः, पादपान सिंचन्ति, जलेन, हानिः, न कुर्यात्, पथिकेभ्यः, आनयेत्, आतपं, वर्धयेत्, प्राणवायुं, संरक्षणम्, यच्छन्ति, सहन्ति। अनिवार्यम्, अस्माकं, धर्मः, संरक्षणम्, मानवः, विद्यालयः, सुंदरताम् |

**अथवा**

**चित्रं दृष्ट्वा मंजूषायाः सहायतया पंचवाक्यानि लिखत –**

चित्र को देखकर मंजूषा की सहायता से पाँच वाक्य लिखिए –



| **मंजूषा** |
|---|
| चित्रम्, वर्तते, अस्ति, पक्षिणः, नदीतटस्य, गृहं, कुरुतः, सन्ति, पक्षिणौ, नदीतटे, वृक्षाः, जलं, नद्याम्, स्वच्छः, शिलाखंडाः, हरितमयं, सुंदरं, उभयतः, आकाशे, विहरन्ति, वातावरणं, शान्तं |

(1) ––––––––––––––––––––––––––
(2) ––––––––––––––––––––––––––
(3) ––––––––––––––––––––––––––
(4) ––––––––––––––––––––––––––
(5) ––––––––––––––––––––––––––

**प्रश्न 04 मंजूषायां दत्तैः शब्दैः कथां पूरयित्वा उत्तरपुस्तिकायां पुनः लिखत –** **(1/2×10=5 अंकाः)**

मंजूषा में दिए शब्दों के द्वारा कथा को पूर्ण करके उत्तर पुस्तिका में पुनः लिखिए –

एकदा एका(1) ––––––– बालिका पित्रा सह मेलां दृष्टुं (2) ––––––– प्रति गच्छति स्म। सा चतुरमतिः (3) ––––––– च आसीत्। सा बाल्यकाले एव विविधासु (4) ––––––– परांगता आसीत्। मार्गे एका (5) ––––––– आसीत् सा नदीं (6) ––––––– गच्छति स्म। नौकायाम् अनेके जनाः आसन्। नद्यां एकः मकरः दृष्टः। मकरं दृष्ट्वा मकरात् भीतौ द्वौ जनौ जले पतितौ। तयोः मुखे भयस्य छाया आसीत्। सा अपि भीता आसीत् परन्तु अचिन्तयत् – तयोः (7) ––––––– करणीयम् ? सा जले अकूर्दत्। तयोः (8) –––––––हस्तौ गृहीत्वा नौकां प्रति च अनयत्।सा तयोः (9) –––––––।

सा साहसी बालिका (10) ––––––– आसीत्। एतस्यै वीरबालिकायै नमः।

| मंजूषा |
|---|
| लक्ष्मीबाई, पंचवर्षीया, धैर्यशालिनी, विद्यासु, रक्षणमकरोत्, नगरं, नदी, रक्षणं, नौकया, जनयोः |

**अथवा**

**मंजूषातः उचितानि पदानि चित्वा संवादं प्रपूर्य उत्तरपुस्तिकायां पुनः लिखत –**

मंजूषा से उचित शब्द को चुनकर संवाद को पूर्ण करके उत्तर पुस्तिका में पुनः लिखिए –

सुखदा – सखि! किं जानासि अद्य कः उत्सवः अस्ति ?

नमिता – अद्य (1) ––––––––––– अस्ति।

सुखदा – तदा तु अद्य वयं (2) –––––––– वस्त्राणि धारयिष्यामः।

नमिता – मम माता अपि नवीनां (3) ––––––– धारयिष्यति।

सुखदा – अहं पित्रा सह हट्टं (4) –––––––– क्रीडनकानि मिष्ठान्नं च क्रेष्यामि।

नमिता – त्वं मिष्ठान्नं क्रीत्वा किं करिष्यसि ?

सुखदा – वयं मिष्ठान्नं परिवाराय (5) –––––––– दास्यामः।

नमिता – किं मित्रेभ्यः किंचिदपि न दास्यसि ?

सुखदा – किमर्थं न वयं मित्रेभ्यः अपि मिष्ठान्नं (6) ––––––––

नमिता – रात्रौ वयं सर्वे बालकाः मित्राणि च मिलित्वा (7) –––––––– चालयिष्यामः।

सुखदा – अहं तु विस्फोटकपदार्थानां (8) –––––––– करिष्यामि।

नमिता – किमर्थम्

सुखदा – यत् तेषां (9) –––––––– ध्वनिना च प्रदूषणं प्रसरति।

नमिता – समीचीनं कथितम्। अहं रात्रौ (10) ––––––––तु करिष्यामि परं विस्फोटकपदार्थान् न चालयिष्यामि।

| मंजूषा |
|---|
| धूम्रेण, बान्धवेभ्यः, बहिष्कारम्, दीपावली, नवीनानि, शाटिकाम्, वितरिष्यामः, लक्ष्मीपूजनम्, गत्वा, विस्फोटकपदार्थान् |

**(खण्ड ग)**

**अनुप्रयुक्तव्याकरणम् (25 अंकात्मकः)**

**प्रश्न 05 सन्धिं सन्धिविच्छेदं वा कृत्वा रिक्तस्थानानि प्रपूर्य वाक्यानि लिखत –(प्रश्नचतुष्टयं)(1×4=4 अंकाः)**

सन्धि और सन्धिविच्छेद करते हुए रिक्तस्थानों को भरकर वाक्यों को पूरा करके लिखिए।(4 प्रश्न)

(1) मंदं–मंदं **(पवनं)** ––– + ––– वहति।

(2) छात्रः अध्ययनेन **(वाक्+ईशः)** –––––– भवति।

(3) त्वम् **(इन्द्रियाण्यादौ)** ––– + ––– नियम्य।

(4) **(तत्+शरेण)** –––––– हरिणः मृतः।

(5) **(सत्+चरित्रम्)** ––––––– पूज्यनीयं भवति।

**प्रश्न 06 समासं विग्रहं वा कृत्वा रिक्तस्थानानि प्रपूर्य वाक्यानि लिखत –** **(1×4=4 अंकाः)**

समास/विग्रह करते हुए रिक्तस्थानों को भरकर वाक्यों को पूरा करके लिखिए –

(1) **(शरणम् आगतं)** ––––––– सर्वदा रक्षणीयम्।

**(क)** शरणागतं **(ख)** शरणमागंतं **(ग)** शरणं आगतं **(घ)** आगतश्शरणम्

(2) **(चन्द्रमुखम्)** –––––– शोभते ईश्वरः।

**(क)** चन्द्र अस्ति यस्य मुखम् **(ख)** चन्द्रः यः सः मुखम्

**(ग)** चन्द्र इव मुखम् **(घ)** चन्द्रानां मुखानां समाहारः

(3) **(चतुर्मुखः)** –––––– वेदानां रचनाम् अकरोत्।

**(क)** चतुरः मुखः **(ख)** चत्वारि यः सः मुखम्

**(ग)** चतुराणि मुखानि यस्य सः(ब्रह्मा) **(घ)** चत्वारि च मुखानि च

(4) व्याकरणस्य प्राचीनतमः ग्रन्थः **(अष्टानाम् अध्यायानाम् समाहारः)** –––– अस्ति।

**(क)** अनष्टाध्यायी **(ख)** अष्टाध्यायी

**(ग)** अष्टाध्यायसमाहारः **(घ)** अष्टपाठाः

**प्रश्न 07 प्रकृति प्रत्ययं योजयित्वा उचितम् उत्तरं चिनुत – (प्रश्नचतुष्टयम्)** **(1×4=4 अंकाः)**

प्रत्यय और मूल शब्दों को जोड़कर उचित उत्तर चुनकर लिखिए (कोई चार)

(1) छात्रः वचनं **(श्रृ+क्त्वा)** ––––– आज्ञां पालयति।

**(क)** श्रोतुम् **(ख)** श्रृण्वन् **(ग)** श्रुत्वा **(घ)** श्रुतः

(2) बालकः उपहारं **(दा+तुमुन्)** ––––– मित्रं मिलति।

**(क)** दत्तः **(ख)** दातुम् **(ग)** दीयमानः **(घ)** दत्तवान्

(3) प्रमोदः कार्यं **(कृ+शानच्)** ––––– प्रसन्नः भवति।

**(क)** कुर्वन् **(ख)** क्रियमाणः **(ग)** कृतः **(घ)** करणीयः

(4) छात्रेण पाठं **(पठ्+क्त्)** –––––।

**(क)** पठितः **(ख)** पठितवान् **(ग)** पठितुम् **(घ)** पठन्

(5) माता पुत्रस्य वेदनां **(ज्ञा+क्तवतु)** ––––– ।

**(क)** ज्ञाता **(ख)** ज्ञात्वा **(ग)** ज्ञातुम् **(घ)** ज्ञातवती

(6) माता भेजनं **(पच्+शतृ)** ––––– वार्तालापं करोति।

**(क)** पच्यमानः **(ख)** पचित्वा **(ग)** पचन्ती **(घ)** पचितुम्

**प्रश्न 08 निर्देशानुसारं वाच्य परिवर्तनम् कृत्वा उत्तरपुस्तिकायां लिखत –(प्रश्नत्रयम्)** **(1×3=3 अंकाः)**

निर्देश के अनुसार वाक्य परिवर्तन करके उत्तरपुस्तिका में लिखिए। (तीन प्रश्न)

(1) सः रोटिकां खादति। (कर्मवाच्ये)

(2) गायकेन गीतं गीयते। (कर्तृवाच्ये)

(3) छात्रेण ग्रन्थः पठ्यते। (कर्तृवाच्ये)

(4) शकुन्तला राजभवनम् गच्छति। (कर्मवाच्ये)

**प्रश्न 09 कोष्ठके दत्तं समयं संस्कृतेन विलिख्य वाक्य उत्तरपुस्तिकायां लिखत –(प्रश्नत्रयम्)(1×3=3अंकाः)**

कोष्टक में दिए समय को संस्कृत में लिखकर वाक्यों को उत्तरपुस्तिका में लिखिए।(तीन प्रश्न)

(1) महिमा विद्यालयात् **(2:15)** ——————— वादने आगच्छति।

(2) सा **(2:20)** —————— वादने भोजनं करोति।

(3) तया **(3:45)** —————— वादने विश्रामः क्रियते।

(4) सा **(4:05)** ——————— वादनतः 4:50 वादनपर्यन्तं गृहकार्यं करोति।

**प्रश्न 10 मंजूषायां दत्तैः उचितैः अव्ययपदैः रिक्त स्थानानि पूरयित्वा वाक्यानि लिखत – (1×4=4 अंकाः)**

कोष्टक में दिए उचित अव्ययपदों से रिक्तस्थानों को भरकर वाक्यों को पूरा करके लिखिए।

| |
|---|
| **मंजूषा –** सम्प्रति, भूयोभूयः, नमः, मा |

(1) अहं त्वाम् ——————— नमामि।

(2) पुस्केभ्यो ——————।

(3) वृथा कलहं——————— कुरू।

(4) अहं ——————— गृहं गन्तुमिच्छामि।

**प्रश्न 11 रेखांकितपदायै शुद्धं पदं चित्वा अशुद्धिशोधनं कृरुत – (प्रश्नत्रयं) (1×3=3 अंकाः)**

उचितपद चुनकर वाक्य शुद्ध कीजिए। (कोई तीन)

(1) छात्रेण पाठाः <u>**पठति**</u>।

**(क)** पठ्यते **(ख)** पठति **(ग)** पठ्यन्ते **(घ)** विज्ञानशीलम्

(2) <u>**शुद्धम्**</u> पवनः वहति।

**(क)** शुद्धः **(ख)** शुद्धा **(ग)** शुद्धे **(घ)** सर्वे शुद्धाः

(3) <u>**पठ्यमाना**</u> छात्रः चिन्तयति।

**(क)** पठ्यमानम् **(ख)** पठ्यमानः **(ग)** पठ्यमानाः **(घ)** पठ्यमानौ

(4) **अस्य** बालिकायाः माता सम्माननीया महिला अस्ति।

**(क)** एतस्य **(ख)** अस्यै **(ग)** अस्याः **(घ)** अस्याम्

## (खण्ड घ)

## पठितावबोधनम् (30 अंकात्मकः)

**प्रश्न 12 अधोलिखितं गद्यांशं पठित्वा प्रदत्त प्रश्नानामुत्तराणि संस्कृतेन लिखत –**

(नीचे लिखे गद्यांश को पढ़कर दिए प्रश्नों के उत्तर संस्कृत में लिखिए।)

एकदा भगवान् बोधिसत्व बहुजन्मार्जितपुण्यफलैः शिवीनां राजा अभवत्। स बाल्यकालाद् एव वृद्धोपसेवी विनयशीलः शास्त्रपरांगतः च आसीत। जनकल्याणकर्मसु रतः असौ पुत्रवत् प्रजाः पालयति स्म। कारूण्य–औदार्यादिगुणोपेतः स नगरस्य समनततः धनधान्यसमृद्धाः दानशालाः अकारयत्। तत्र अर्थिनां समूहः अन्न–पान–वसन–रजत–स्वर्णादिकानि अभीष्टानि वस्तूनि प्राप्य सन्तुष्टः अभवत्। राज्ञः दानशीलताम् आकर्ण्य देशान्तरेभ्योपि जनाः तं देशं आयान्ति स्म।

**(अ) एकपदेन उत्तरत –** (केवलं प्रश्नद्वयम्) **(1/2×2=1 अंकः)**

(1) राज्ञः काम् आकर्ण्य जनाः तं देशं आयान्ति स्म ?

(2) किं नाम् राजा अभवत् ?

(3) भगवान् बोधिसत्व कैः राजा अभवत् ?

**(ब) पूर्णवाक्येन उत्तरत –** (केवलं प्रश्नद्वयम्) **(1×2=2 अंकौ)**

(1) राजा बाल्यकालाद् एव कथम् आसीत ?

(2) अर्थिनां समूहः कानि प्राप्य सन्तुष्टः अभवत ?

(3) राजा कथं प्रजाः पालयति स्म ?

**(स) यथानिर्देशं उत्तरत –** **(1×2=2 अंकौ)**

(1) देशान्तरेभ्योपि जनाः तं देशं आयान्ति स्म। रेखांकितपदस्य विग्रहः किम् ?

(क) देशान्तर+आभ्यः+अपि (ख) देशान्तरेभ्यः+अपि

(ग) देशान्त+ऐभ्योपि (घ) अन्यः

(2) 'पापम्' इत्यस्य किं विलोमपदं गद्यांशे प्रयुक्तम् –

(क) कर्मफलम् (ख) पुण्यम् (ग) सन्तुष्टः (घ) असन्तुष्टः

**प्रश्न 13 अधोलिखितं पद्यांशं पठित्वा प्रदत्त प्रश्नानामुत्तराणि संस्कृतेन लिखत –**

(नीचे लिखे पद्यांश को पढ़कर दिए प्रश्नों के उत्तर संस्कृत में लिखिए।)

ध्यायतः विषयान् पुंसः, सङ्गस्तेषूपजायते।
सङ्गात्संजायतेकामः, कामात् क्रोधोभिजायते।।

**(अ) एकपदेन उत्तरत –** (केवलमेकंप्रश्नम्) **(1×1=1 अंकः)**

(1) कामात् कः अभिजायते ?

(2) कान् ध्यायतः सङ्गः उपजायते ?

**(ब) पूर्णवाक्येन उत्तरत –** (केवलं प्रश्नद्वयम्) **(1×2=2 अंकौ)**

(1) सङ्गः कथं उपजायते ?

(2) कामः कस्मात् जायते ?

**(स) यथानिर्देशं उत्तरत –** **(1×2=2 अंकौ)**

(1) तेषूपजायते। वाक्येस्मिन् का संधिः अस्ति ?

(क) दीर्ध (ख) गुण (ग) वृद्धि (घ) यण

(2) उत्पन्नः भवति इत्यर्थे किं पदं श्लोके प्रयुक्तम् ?

(क) जायते (ख) उपजायते (ग) संजायते (घ) सर्वे

**प्रश्न 14 अधोलिखितं नाट्यांशं पठित्वा प्रदत्त प्रश्नानामुत्तराणि संस्कृतेन लिखत –**

(नीचे लिखे नाट्यांश को पढ़कर दिए प्रश्नों के उत्तर संस्कृत में लिखिए।)

राजहंसः –अये! किन्नु खलु सरस्तीरे विहरति मयि केनापि कर्कशैः 'का का' शब्दैः वातावरणं आकुलीक्रियते ?

राजहंसी –भर्तः! काकात् अन्यः को भवितुमर्हति ? अस्य वर्णस्य अपि कृष्णः कर्म अपि कृष्णम्।

मेध्यम् अमेध्यं सर्वमेव भक्षयति कर्णकटुशब्दैः .....

काकः – (प्रविश्य सक्रोधेन) आः! किम् उक्तवती भवती ? यदि अहं कृष्णवर्णः श्रीरामस्य वर्णः कीदृशः ? श्रीवसुदेवस्य वर्णः कीदृशः ? मुग्धे! अहं तु अतीव कर्त्तव्यपरायणः। प्रभाते का का ध्वनिना सुप्तान् प्रबोधयामि, कर्मसु च नियोजयामि।

राजहंसः – हुं! किमनेन ? एतत कार्यं तु कुक्कुटोऽपि करोति।

काकः – (विहस्य) कुक्कुटः। अरे अद्य कुतः कुक्कुटाः नगरेषु। अहमेव सर्वत्र सुलभः।

राजहंसी – भोः भो वाचाल! स्वीयैः कटुभिः क्वणितैः जनजागरणात् अन्यत् तु किमपि न करोषि ?

**(अ) एकपदेन उत्तरत –** (केवलं प्रश्नद्वयम्) **(1/2×2=1 अंकः)**

(1) कैः शब्दैः वातावरणं आकुलीक्रियते ?

(2) कस्य कर्म अपि कृष्णम् वर्तते ?

(3) कः सर्वमेव भक्षयति ?

**(ब) पूर्णवाक्येन उत्तरत –** (केवलं प्रश्नद्वयम्) **(1×2=2 अंकौ)**

(1) काकः कर्त्तव्यपरायणविषये किम् उक्तवान् ?

(2) सरस्तीरे कः विहरति ?

(3) राजहंस्याः अनुसारं काकः किम् अन्यत् न करोति ?

**(स) यथानिर्देशं उत्तरत – (1×2=2 अंकाः)**

(1) कर्मसु च नियोजयामि। वाक्येस्मिन् क्रियापदं किम् ?

(क) कर्मसु (ख) कर्मः (ग) नियोजय (घ) नियोजयामि

(2) अहं तु अतीव कर्त्तव्यपरायणः। वाक्येस्मिन् अव्ययपदं किम् ?

(क) अहं (ख) अतीव (ग) कर्त्तव्य (घ) परायणः

**प्रश्न 15 रेखांकितान् शब्दान् आधृत्य प्रश्ननिर्माणं कुरुत – (पंच प्रश्नाः) (1×5=5 अंकाः)**

(रेखांकित शब्दों के आधार पर प्रश्ननिर्माण कीजिए) (कोई पाँच)

(क) **<u>मनसः</u>** निग्रहः वायोः इव कठिनः।

(ख) **<u>विषयाणाम्</u>** उपभोगेन् आसक्तिः वर्धते।

(ग) अवधीरिताः **<u>अस्माभिः</u>** गुरुजनोपदेशाः।

(घ) बकः मीनान् छलेन् अधिगृह्य **<u>क्रूरतया</u>** भक्षयति।

(ङ) **<u>दानशालासु</u>** विचरन् राजा अचिन्तयत्।

(च) **<u>भारत्याः</u>** कोशः अपूर्वः।

**प्रश्न 16 प्रदत्तस्य श्लोकस्य अन्वयं प्रपूर्य लिखत – (2 अंकौ)**

(दिए श्लोक के अन्वय में रिक्तस्थान भरकर उत्तर पुस्तिका में लिखिए)

आचार्यात्पादमादत्ते पादं शिष्यः स्वमेधया।
कालेन् पादमादत्ते पादं सब्रह्मचारिभिः।।

**अन्वयः–** शिष्यः ------ पादम् आदत्ते। शिष्यः ------- पादं आदत्ते।
कालेन् पादं ------। शिष्यः ------- पादम् ---।

**प्रश्न 17 प्रसंगानुसारम् उचितम् अर्थं चित्वा लिखत – (1×4=4अंकाः)**

प्रसंग के अनुसार उचित अर्थ वाले उत्तर चुनकर लिखिए–

(1) चंचलम् हि मनः कृष्ण! **<u>प्रमाथि</u>** बलवद्दृएम्।

(क) मथनशीलं (ख) चिंतनशीलम् (ग) ज्ञानशीलम् (घ) विज्ञानशीलम्

(2) स्वध्यायाभ्यसनं चैव **<u>वाङ्मयं</u>** तपः उच्यते।

(क) मनोमयम्  (ख) तपोमयम्  (ग) साहित्यम्  (घ) ग्रन्थम्

(3) <u>**सकलं**</u> ब्रह्माण्डं व्याकुलं संजातम्।

(क) परिपूर्णम्  (ख) अपूर्णम्  (ग) सम्पूर्णम्  (घ) अंशम्

(4) **मेध्यम्** अमेध्यं सर्वं भक्षयति।

(क) मेधाविनम्  (ख) अतर्क्यम्  (ग) विशुद्धम्  (घ) अभक्षणीयम्

**प्रश्न 18 घटनाक्रमानुसारं वाक्यानि पुस्तिकायां लिखत –** **(4 अंकौ)**

(घटना को क्रम के अनुसार उत्तर पुस्तिका में लिखिए)

**(क)** सुपकारैः नित्यं ताडितं मेषं दृष्ट्वा वानरयूथपतिः वानरान् राजभवनं त्यक्तुम् अकथयत्।

**(ख)** राजा राजवैद्यम् आहूय अश्वरक्षायै न्यवेदयत्।

**(ग)** भूपतेः चन्द्रस्य पुत्राः वानरान् भोज्यपदार्थैःपुष्टिं नयन्ति स्म।

**(घ)** ज्वलन् स मेषः अश्वशालां प्रविष्टः। परिणामतः दग्धाः अश्वाः प्राणत्राणाय अधावन्।

**(ङ)** भयत्रस्ता कपयः गुरुजनोपदेशस्य अवधीरणातः पश्चातापं कृतवन्तः।

**(च)** अन्यस्मिन् अहनि स मेषः सूपकारेण अर्धज्वलितकाष्ठेन ताडितः।

**(छ)** राजगृहे बालवाहनयोग्यः मेषः जिह्वालोलुपतया महानसं प्रविश्य भोजनं खादति स्म।

**(ज)** रसनास्वादलुब्धाः मदोद्धताः मर्कटाः तद् राजभवनं त्यक्तुम् न स्वीकृतवन्तः।

—————————————————————— इत्यलम् ——————————————————————